श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### एकचत्वारिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## एकचत्वारिंशः सर्गः

*हनुमता प्रमदावनस्य विध्वंसः*

स च वाग्भिः प्रशस्ताभिर्गमिष्यन् पूजितस्तया।
तस्माद् देशादपाक्रम्य चिन्तयामास वानरः॥ ५.४१.१ ॥

अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा।
त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते॥ ५.४१.२ ॥

न साम रक्षःसु गुणाय कल्पते
    न दानमर्थोपचितेषु युज्यते।
न भेदसाध्या बलदर्पिता जनाः
    पराक्रमस्त्वेष ममेह रोचते॥ ५.४१.३ ॥

न चास्य कार्यस्य पराक्रमादृते
    विनिश्चयः कश्चिदिहोपपद्यते।
हतप्रवीराश्च रणे तु राक्षसाः
    कथञ्चिदीयुर्यदिहाद्य मार्दवम्॥ ५.४१.४ ॥

कार्ये कर्मणि निर्वृत्ते यो बहून्यपि साधयेत्।
पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति॥ ५.४१.५ ॥

न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः।
यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने॥ ५.४१.६ ॥

इहैव तावत्कृतनिश्चयो ह्यहं
    व्रजेयमद्य प्लवगेश्वरालयम्।

www.prapatti.com

परात्मसम्मर्दविशेषतत्त्ववित्
ततः कृतं स्यान्मम भर्तृशासनम्॥ ५.४१.७ ॥

कथं नु खल्वद्य भवेत् सुखागतं
प्रसह्य युद्धं मम राक्षसैः सह।
तथैव खल्वात्मबलं च सारवत्
समानयेन्मां च रणे दशाननः॥ ५.४१.८ ॥

ततः समासाद्य रणे दशाननं
समन्त्रिवर्गं सबलं सयायिनम्।
हृदि स्थितं तस्य मतं बलं च
सुखेन मत्वाहमितः पुनर्व्रजे॥ ५.४१.९ ॥

इदमस्य नृशंसस्य नन्दनोपममुत्तमम्।
वनं नेत्रमनःकान्तं नानाद्रुमलतायुतम्॥ ५.४१.१० ॥

इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः।
अस्मिन् भग्ने ततः कोपं करिष्यति स रावणः॥ ५.४१.११ ॥

ततो महत्साश्वमहारथद्विपं
बलं समानेष्यति राक्षसाधिपः।
त्रिशूलकालायसपट्टिशायुधं
ततो महद्युद्धमिदं भविष्यति॥ ५.४१.१२ ॥

अहं च तैः संयति चण्डविक्रमैः
समेत्य रक्षोभिरभङ्गविक्रमः।
निहत्य तद् रावणचोदितं बलं
सुखं गमिष्यामि हरीश्वरालयम्॥ ५.४१.१३ ॥

ततो मारुतवत् क्रुद्धो मारुतिर्भीमविक्रमः।
उरुवेगेन महता द्रुमान् क्षेप्तुमथारभत्॥ ५.४१.१४ ॥

ततस्तद्धनुमान् वीरो बभञ्ज प्रमदावनम्।
मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम्॥ ५.४१.१५ ॥

तद्वनं मथितैर्वृक्षैर्भिन्नैश्च सलिलाशयैः।
चूर्णितैः पर्वताग्रैश्च बभूवाप्रियदर्शनम्॥ ५.४१.१६ ॥

नानाशकुन्तविरुतैः प्रभिन्नसलिलाशयैः।
ताम्रैः किसलयैः क्लान्तैः क्लान्तद्रुमलतायुतैः॥ ५.४१.१७ ॥

न बभौ तद् वनं तत्र दावानलहतं यथा।
व्याकुलावरणा रेजुर्विह्वला इव ता लताः॥ ५.४१.१८ ॥

लतागृहैश्चित्रगृहैश्च सादितै-
    र्व्यालैर्मृगैरार्तवरैश्च पक्षिभिः।
शिलागृहैरुन्मथितैस्तथा गृहैः
    प्रणष्टरूपं तदभून्महद् वनम्॥ ५.४१.१९ ॥

सा विह्वलाशोकलताप्रताना
    वनस्थली शोकलताप्रताना।
जाता दशास्यप्रमदावनस्य
    कपेर्बलाद्धि प्रमदावनस्य॥ ५.४१.२० ॥

ततः स कृत्वा जगतीपतेर्महान्
    महद् व्यलीकं मनसो महात्मनः।
युयुत्सुरेको बहुभिर्महाबलैः
    श्रियाज्वलंस्तोरणमाश्रितः कपिः॥ ५.४१.२१ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः॥